# 48 - अष्टचत्वारिंश दशकम्
# नलकूबर मणिग्रीवयोः शापमोक्षम्

मुदा सुरौघैस् त्व मुदार सम्मदैः उदीर्य दामोदर इत्यभिष्टुतः ।
मृदूदरस् स्वैर मुलूखले लगन् अदूरतो द्वौ ककुभा वुदैक्षथाः ॥॥48-1॥

कुबेर सूनुर् नल कूब राभिधः परो मणिग्रीव इति प्रथांगतः ।
महेश सेवाधिगत श्रियोन्मदौ चिरं किल त्वद्विमुखाव खेलताम् ॥48-2 ॥

सुरापगायां किल तौ मदोत्कटौ सुराप गायद् बहु यौव तावृतौ ।
विवाससौ केलिपरौ स नारदः भवत् पदैक प्रवणो निरैक्षत ॥॥48-3॥

भिया प्रिया लोक मुपात्त वाससं पुरो निरीक्ष्यापि मदान्ध चेतसौ ।
इमौ भवत्भक्त्युप शान्ति सिद्धये मुनिर्जगौ शान्तिमृते कुतः सुखं॥॥48-4॥

युवा मवाप्तौ ककु भात्मतां चिरं हरिं निरीक्ष्याथ पदं स्वमाप्नु तम् ।
इतीरितौ तौ भव दीक्षण स्पृहां गतौ व्रजान्ते ककुभौ बभूवतुः ॥॥48-5॥

अतन्द्र मिन्द्र द्रु युगं तथा विधं समेयुषा मन्थर गामिना त्वया ।
तिरायि तोलूखल रोध निर्धुतौ चिराय जीर्णौ परिपातितौ तरू ॥॥48-6॥

अभाजि शाखि द्वितयं यदा त्वया तदैव तद् गर्भतलान् निरेयुषा ।
महात्विषा यक्ष युगेन तत्क्षणात् अभाजि गोविन्द भवानपि स्तवैः ॥48-7॥

इहान्य भक्तोऽपि समेष्यति क्रमात् भवन्त मेतौ खलु रुद्र सेवकौ ।
मुनि प्रसादाद् भवङ्घ्रि मागतौ गतौ वृणानौ खलु भक्ति मुत्तमाम् ॥48-8 ॥

ततस् तरू द्दारण दारुणारव प्रकम्पि सम्पातिनि गोप मण्डले ।
विलज्जित त्वज्जननी मुखेक्षिणा व्यमोक्षि नन्देन भवान् विमोक्षदः॥ 48-9 ॥

मही रुहोर् मध्यगतो बतार्भको हरेः प्रभावा दपरिक्षतोऽधुना ।
इति ब्रुवाणैर् गमितो गृहं भवान् मरुत् पुराधीश्वर पाहिमां गदात् ॥48-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥